श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री श्रीनिवासाचार्यसूरिणा विरचितम्

# ॥ श्री मयूरपुर वेङ्कटेशसुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मयूरपुर वेङ्कटेशसुप्रभातम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कौसल्यासुप्रजाराम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु॥

वेदान्तदेशिकपदे विनिवेष्टुमीशः
श्रीमानसौ प्रयतते वृषशैलनाथः।
स त्वां निरीशजनगर्वविमोचनाय
श्रुत्यन्तदेशिक कवीश्वर सुप्रभातम्॥ **1** ॥

वेदापहारजनितश्रमनोदनाय
हेषारवेण मधुकैटभशात्रुनाशिन्।
वेदान्तदेशिकसुपूजितदिव्यमूर्ते
लक्ष्मीहयाननविभो तव सुप्रभातम्॥ **2** ॥

रक्षोविनाश मखरक्षण चापभङ्ग
सीताविवाह वनगाहन सेतुकारिन्।
चिच्छेद यो दशमुखस्य शिरांसि वीर
ते जानकीरमण राघव सुप्रभातम्॥ **3** ॥

प्रह्लादपीडनसमुत्थरुषा सुवर्ण -
स्तम्भादुदेत्य कशिपुं च हिरण्यपूर्वम्।
वक्षोविदारमवधीः भगवन्नखैस्त्वम्
लक्ष्मीनृकेसरिविभो तव सुप्रभातम्॥ **4** ॥

यस्याट्टहासविवृतं वदनं विलोक्य
तुष्टूषुवो रिपुसमूहरणे पिशाचाः।
भीता नटन्ति पुरतश्च सह प्रियाभिः
शौरे रथाङ्गभगवन् तव सुप्रभातम्॥ **5** ॥

मातस्समस्तजगतां मधुकैटभारेः
वक्षोविहाररसिके करुणामृताब्धे।
क्षीराम्बुराशितनये श्रितकल्पवल्लि
श्रीश्रीनिवासदयिते तव सुप्रभातम्॥ **6** ॥

देवाधिदेवमुनिबृन्द सुपूजिताङ्घ्रे
सन्तप्तकाञ्चनमनोहरदिव्यमूर्ते।
नित्याभिवाञ्छितसरोरुहपादपद्मे
श्रीवेङ्कटेशदयिते तव सुप्रभातम्॥ **7** ॥

श्रीपद्मनाभ ! पुरुषोत्तम ! वासुदेव !
वैकुण्ठ ! माधव ! जनार्दन ! चक्रपाणे !।
श्रीश्रीनिवास ! गरुडध्वज ! पुष्कराक्ष !
श्रीमन् ! सुरासुरपते ! तव सुप्रभातम्॥ **8** ॥

अत्र्यादिका मुनिगणाः विरचय्य नित्य -
कर्माणि फुल्लसरसीरुहपुष्पवर्गान्।
पादार्पणाय परिगृह्य पुरो लसन्ति
श्रीगारुडाचलपते तव सुप्रभातम्॥ **9** ॥

नित्याश्चतुर्मुखपुरन्दरशङ्कराद्याः
सिद्धास्सनातन सनन्दन योगिवर्याः।
त्वामर्चितुं विविधपुष्पकराः वसन्ति
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **10** ॥

कन्दर्पसुन्दरतिरस्कृतदिव्यमूर्ते
कान्ताकुचाम्बुरुह कुड्मललोलदृष्टे।
सौहार्दसौम्यकरुणादिगुणैकसिन्धो
नारायणाचलपते तव सुप्रभातम्॥ **11** ॥

मत्स्याकृते ! कमठरूप ! वराहरूप !
श्रीमन्नृसिंह ! धृतवामन ! जामदग्न्य !।
काकुत्स्थराम ! बलभद्र ! विहारकृष्ण !
कल्किन् ! वृषाचलपते ! तव सुप्रभातम्॥ **12** ॥

सन्ध्यामुपास्य मुनि यामुन लक्ष्मणाद्याः
सङ्गृह्य पुण्यसरितः कनकाम्बुजानि।
तिष्ठन्ति ते पदयुगार्चनजागरूकाः
श्री अञ्जनाचलपते ! तव सुप्रभातम्॥ **13** ॥

लक्ष्मीनिवास निरवद्यदयैकसिन्धो
संसारगर्तविनिपातितभक्तवर्गान्।
संरक्षणार्थमिह बर्हिपुरावतीर्ण
श्री वेङ्कटाचलपते ! तव सुप्रभातम्॥ **14** ॥

पार्श्वद्वयस्थितरमामहिशोभमान !
श्रीमन्मयूरपुरभाग्यकृतावतार !।
स्वामिन् ! सुशील ! सुलभाश्रितपारिजात !
श्रीवेङ्कटाचलपते ! तव सुप्रभातम्॥ **15** ॥

ब्रह्मेन्द्ररुद्रधनदप्रमुखाश्च देवाः
भक्ता निजानुगुणकिङ्करतानियुक्ताः।
तिष्ठन्ति सेवितुमनर्घनवोपहाराः
श्रीमन् ! मयूरपुरनायक ! सुप्रभातम्॥ **16**॥

यस्यार्चनाय तुलसीदलबिल्वपत्रा -
ण्यादाय भक्तिसुयुतो वृषभाधिरूढः।
जागर्ति किङ्करतया प्रमथाधिनाथः
श्रीवेङ्कटाचलपते ! तव सुप्रभातम्॥ **17**॥

त्राणाय साधुविततेरसतां निहत्यै
धर्मस्य रक्षणकृते च सनातनस्य।
कारुण्यतः कलितवान् विविधावतारान्
शेषाद्रिशेखरविभो ! तव सुप्रभातम्॥ **18**॥

स्नात्वा विशुद्धमनसा कलितोर्ध्वपुण्ड्राः
धौतांबराः द्रविडवेदविभूषितास्याः।
श्रीवैष्णवाश्च विचरन्ति पवित्रहस्ताः
पद्माक्षशोभितगलाः तव सुप्रभातम्॥ **19**॥

वाराङ्गनाः श्रवण मङ्गलगीतिरक्ताः
वीणामृदङ्गविवशीकृतलोकचित्ताः।
नीराजनं कलयितुं पुरतो यतन्ते
श्रीमन् मयूरपुरनायक ! सुप्रभातम्॥ **20**॥

भेर्यादिघोषितमनन्तपरिच्छदाढ्यं
आरोप्य हेमकलशं कलभेऽभिषेक्तुम्।
आयाति पुण्यसरितः परिचारकौघः
श्रीमन् मयूरपुरनायक ! सुप्रभातम्॥ **21**॥

भक्ता मयूरपुरवासिद्विजोत्तमाद्याः
    द्वारे वसन्ति वरपुष्पफलादियुक्ताः।
त्वन्नामकीर्तनरताः कलितोर्ध्वपुण्ड्राः
    श्रीमन् मयूरपुरनायक ! सुप्रभातम् ॥ 22 ॥

त्वत्पूजनाय सरितः सुगुणं प्रकृष्टं
    तीर्थं सुवर्णघटपूरितमादरेण।
धृत्वा त्वदर्चनपराः विबुधा लसन्ति
    श्रीमन् मयूरपुरनायक ! सुप्रभातम् ॥ 23 ॥

त्वद्बोधनाय चतुरास्सुरनारिवर्याः
    गायन्ति गानकुशलाः तव दिव्यवृत्तम्।
नृत्यन्ति नर्तनपराः वरवारमुख्याः
    श्रीमन् मयूरपुरनायक ! सुप्रभातम् ॥ 24 ॥

उद्बुध्य पञ्जरगताः रमणीयवाचः
    भुक्तावशेषितफलानि विसृज्य सद्यः।
लीलाशुकाः परिपठन्ति भवच्चरित्रं
    श्रीमन् मयूरपुरनायक ! सुप्रभातम् ॥ 25 ॥

त्वत्कीर्तिवर्णनमनोहरमात्ततालं
    गाधासहस्रमभितः परियन्ति वीथ्याम्।
गायन्त उच्चनिनदं तव भक्तवर्गाः
    श्रीमन् मयूरपुरनायक ! सुप्रभातम् ॥ 26 ॥

सौवर्णदण्डयुतचामरयुग्महस्ताः
    श्रीमाधवेति तव नाम मुहुर्वदन्तः।
भृत्याः स्वकृत्यनिरताः हरिभक्तियुक्ताः
    तिष्ठन्ति बर्हिपुरनायक ! सुप्रभातम् ॥ 27 ॥

तुङ्गास्तुरङ्गनिवहाः शुभलक्ष्मयुक्ताः
मत्ता मतङ्गजगणाश्च पुरो लसन्ति।
धेनुश्च वत्ससहितः प्रविभाति चाग्रे
श्रीमन् मयूरपुरनायक ! सुप्रभातम्॥ **28** ॥

सन्तः सुवर्णकलशेषु जलाशयस्य
कर्पूर कुङ्कुम लवङ्ग सुगन्धितीर्थम्।
धृत्वा भवन्तमभिषेक्तुमिह त्वरन्ते
श्रीनीलकण्ठपुरनायक ! सुप्रभातम्॥ **29** ॥

उत्फुल्लसौम्यवदनं तव दिव्यरूपं
संसेवितुं त्विह समागतभक्तवर्गाः।
अन्योन्यमादरवशात् कलहायमाणाः
तिष्ठन्ति वेङ्कटपते ! तव सुप्रभातम्॥ **30** ॥

कृतं वृषाचलेशस्य श्रीनिवासाख्यसूरिणा।
सुप्रभातमिदं भूयात् सतां सन्तोषकारिणम्॥ **31** ॥

॥ इति श्री मयूरपुर वेङ्कटेशसुप्रभातं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥